SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion.in

SAMVARDHINI :- 30/07/2024
Volume – 6
Issue – 1
(ISSN ONLINE:- 2583-7176)
https://samvardhini.in

# सुशीलो मातृपुण्येन

## प्रारम्भिकबाल्यावस्थापालने शिक्षायां च मातुः भूमिका (श्रीमद्भागवतस्य परिप्रेक्ष्ये)

लेखकः
डॉ. संदीप वसन्त जोशी

**शोधसारः**

गर्भावस्थायां षष्ठे सप्तमे मासे बालकः भाषागतभेदान् अपि जानाति । अतः गर्भस्थशिशुना सह मात्रा कृतः संवादः बहु प्रभावं जनयति । मातृभाषायाः व्याख्या अपि अनया क्रियया एव परिकल्पिता अस्ति । अर्थात् गर्भस्थशिशुना सह माता यया भाषया भाषते सा तस्य मातृभाषा इति उच्यते । यद्यपि अस्याम् अवस्थायां बालकः कुटुम्बजनेभ्यः परिजनेभ्यः विभिन्नप्रसङ्गेभ्यः च अधिगन्तुं प्रयतते तथापि तस्य तत् अवगमनं मात्राङ्काधारितम् एव भवति । अर्थात् मात्रा सह तस्य कालः आधिक्येन गच्छति । अतः यथा मातुः शिक्षा तथा तस्य चरित्रनिर्माणं भवति । क्वचित् अपवादभूतानि अपि उदाहरणानि सन्ति यत्र सुमातुः पुत्रः दुर्जनः कुमातुः पुत्रः सज्जनः अपि दृश्यते । सत्यकामजाबालेः आरभ्य विवेकानन्दं यावत् प्रारम्भिकबाल्यावस्थायां मात्रा कृतेन संस्कारेण विश्वे ख्यातानां वीराणाम् आवलिं पश्यामः चेत् एषा आवली सुदीर्घा अस्ति । अतः प्रारम्भिकबाल्यावस्थायां शिक्षणे मातुः भूमिका कीदृशी अस्ति इत्यस्य अवगमनं महत्त्वपूर्णम् अस्ति । श्रीमद्भागवतोक्तचरित्राणाम् आधारेण अत्र मातुः भूमिका उपस्थाप्यते ।

**कूटशब्दाः -** मातुः शिक्षा, प्रारम्भिकबाल्यावस्था, पालनं, शिक्षा, संवेगः, श्रीमद्भागवतम् ।

**डॉ. संदीप वसन्त जोशी**
सहायकाचार्यः (अ.) के.सं.वि.वि.,
क.जे.सोमापरिसरः, मुम्बई
Mail – Sandeep.joshi993@gmail.com

**प्रस्तावना**

प्रारम्भिकबाल्यावस्था जन्मनः षड्वर्षं यावत् स्वीक्रियते । अयं कालः बालकस्य निर्माणकालः अस्ति । यद्यपि औपचारिकशिक्षणं षड्वर्षानन्तरं प्रारभ्यते तथापि प्रारम्भिकबाल्यावस्थायां प्रदत्ता शिक्षा मनुष्यस्य जीवने दीर्घकालं प्रभावं जनयति । अतः प्रारम्भिकबाल्यावस्थायां शिक्षायाः महत्त्वं ज्ञात्वा राष्ट्रियशिक्षानीतौ (2020) प्रथमभागे प्रथमप्रकरणे एव प्रारम्भिकबाल्यावस्थापालनं शिक्षा च इत्यमुं विषयमधिकृत्य सुदीर्घं चिन्तनमुपस्थापितं दृश्यते । प्रारम्भिकबाल्यावस्थायाः महत्त्वं नीतौ एवं प्रतिपादितम् अस्ति-

**बच्चों के मस्तिष्क का ८५ प्रतिशत विकास ६ वर्ष की अवस्था से पूर्व ही हो जाता है । बच्चों के मस्तिष्क के उचित विकास और शारीरिक वृद्धि को सुनिश्चित करने के लिए उसके आरंभिक ६ वर्षों को महत्त्वपूर्ण माना जाता है ।**[1]

नूतनशैक्षणिकव्यवस्थायाम् अपि प्रथमसोपानस्य प्रथमभागे प्रारम्भिकबाल्यावस्थाशिक्षणे अवधानं प्रदत्तम् अस्ति । 'अङ्गणवाडी' 'बालवाटिका' इत्यादीनां माध्यमेन प्रारम्भिकबाल्यावस्थाशिक्षणस्य औपचारिकव्यवस्थाः कल्पिताः सन्ति । बालकस्य शारीरिकः, संज्ञानात्मकः, संवेगात्मकः भाषायाः च विकासः एतस्याः शिक्षायाः उद्देश्यम् अस्ति । प्रारम्भिकबाल्यावस्थापालनं शिक्षा च अर्थात् ECCE इत्यस्य राष्ट्रियनीतेः अनुसारं प्रारम्भिकबाल्यावस्थायाः तिस्रः उपावस्थाः अपि स्वीकृताः सन्ति । गर्भधारणतः जन्म यावत् प्रथमावस्था, जन्मनः वर्षत्रयं यावत् द्वितीयावस्था तृतीयवर्षात् षड्वर्षं यावत् तृतीयावस्था च । बालकस्य व्यक्तित्वनिर्माणदृष्ट्या एताः तिस्रः अपि अवस्थाः अत्यन्तं महत्त्वपूर्णाः सन्ति ।

भारतीयचिन्तनस्य परिप्रेक्ष्ये प्रारम्भिकबाल्यावस्थायाः चिन्तनं कुर्मः चेत् वयं जानीमः यत् भारतीयचिन्तकाः बालकं रिक्तपात्रमिव न पश्यन्ति । यः कोऽपि बालकः तस्य पूर्वसंस्कारानुगुणं सत्त्वरजतमोगुणाभिभूतः सन् जन्म प्राप्नोति । अतः गर्भावस्थातः एव बालके संस्कारस्य आग्रहः दृश्यते । बालकः वेदनानिबन्धं कदा प्राप्नोति ? अर्थात् सुखदुःखादीनां भावान् कदा अनुभवति ? इत्यस्मिन् विषये चरकसंहितायां स्पष्टम् उक्तम् अस्ति यत्-

**यस्य यत्कालमेवेन्द्रियाणि सन्तिष्ठन्ते तत्कालमेवास्य चेतसि वेदनानिबन्धं प्राप्नोति । तस्मात् तदा प्रभृति गर्भः स्पन्दते प्रार्थयते च जन्मान्तरानुभूतमिह यत् किञ्चित् तद् द्वैहृदय्यमाचक्षते वृद्धाः ।**[2]

*तृतीयमासशेषार्द्धमारभ्य चतुर्थमासस्य पूर्वार्द्धं यावत् यत्कालमेव यस्य गर्भस्येन्द्रियाणि श्रोत्रादीनि बुद्धीन्द्रियाणि पाय्वादीनि च कर्मेन्द्रियाणि सन्तिष्ठन्ते संस्थावन्ति भवन्ति तत्कालमेवास्य गर्भस्य ज्ञानक्रियायोर्बहिः प्रव्यक्तत्वाच्चेतसि मनसि वेदनानिबन्धं सुखदुःखनिबन्धं ज्ञानं कर्म च भावं प्राप्नोति ।*

---

[1] राष्ट्रीय शिक्षा नीति २०२०, 1.1

[2] चरकसंहिता, शरीरस्थानम्, ४ अ.

*तस्मात् इन्द्रियसंस्थानेन वेदनानिबन्धप्राप्तिस्तदा तत्कालात् प्रभृति सुखाय स्पन्दते दुःखापनोदनाय प्रार्थयते च सुखार्थं दुःखापनोदनाय । पृ.१९९५*

अर्थात् तृतीयमासस्य उत्तरार्धमारभ्य च चतुर्थमासस्य पूर्वार्धं यावत् गर्भस्य कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि क्रियाशीलानि भवन्ति । तदारभ्य सः मनसि सुखं दुःखं च अनुभवति ।

गर्भावस्थायां षष्ठे सप्तमे मासे बालकः भाषागतभेदान् अपि जानाति । अतः गर्भस्थशिशुना सह मात्रा कृतः संवादः बहु प्रभावं जनयति । मातृभाषायाः व्याख्या अपि अनया क्रियया एव परिकल्पिता अस्ति । अर्थात् गर्भस्थशिशुना सह माता यया भाषया भाषते सा तस्य मातृभाषा इति उच्यते । प्रारम्भिकबाल्यावस्थायाः शिक्षायाः प्रथमपादक्षेपः मात्रा सह गर्भात् एव बालकस्य जायते । अतः प्रारम्भिकबाल्यावस्थायां मात्रा प्रदत्ता शिक्षा बालकस्य व्यक्तित्वस्य निर्माणे तस्य समग्रतया परिवर्तने च कारणीभूता भवति । यद्यपि अस्याम् अवस्थायां बालकः कुटुम्बजनेभ्यः परिजनेभ्यः विभिन्नप्रसङ्गेभ्यः च अधिगन्तुं प्रयतते तथापि तस्य तत् अवगमनं मात्राङ्काधारितम् एव भवति । अर्थात् मात्रा सह तस्य कालः आधिक्येन गच्छति । अतः यथा मातुः शिक्षा तथा तस्य चरित्रनिर्माणं भवति । क्वचित् अपावादभूतानि अपि उदाहरणानि सन्ति यत्र सुमातुः पुत्रः दुर्जनः कुमातुः पुत्रः सज्जनः अपि दृश्यते । सत्यकामजाबालेः आरभ्य विवेकानन्दं यावत् प्रारम्भिकबाल्यावस्थायां मात्रा कृतेन संस्कारेण विश्वे ख्यातानां वीराणाम् आवली सुदीर्घा अस्ति । अतः प्रारम्भिकबाल्यावस्थायां शिक्षणे मातुः भूमिका कीदृशी अस्ति इत्यस्य अवगमनं महत्त्वपूर्णम् अस्ति ।

**आद्यगुरुः – माता**

गर्भावस्थायां शिशुः यत् इच्छति तदनु मातुः इच्छा जायते इति वृद्धानां विश्वासः **तद् द्वैहृदय्यमाचक्षते वृद्धाः** इत्युक्त्वा चरकाचार्येणापि एतस्य समर्थनं कृतम् । रघुवंशे अपि

**उपेत्य सा दोहददुःखशीलतां यतेव वक्त्रे तदपश्यदाहृतम् ।**
**न हीष्टमस्य त्रिदिवेऽपि भूपतेरभूदनासाद्यमधिज्यधन्वनः ॥**[3]

इत्यत्र दिलीपेन कृतदोहदव्यथानिवारणं वर्णितम् अस्ति । यदि मातुः दोहदपूर्तिः न भवति चेत् बालकस्य विकासः सम्यक्तया न भवति बालकः अस्थिरमनस्कः भवति इति उच्यते । तेन बालकस्य भावात्मकः विकासः गर्भात् एव आरभ्यते इति ज्ञायते । माता यथा संस्कारं करोति तथा बालकस्य व्यक्तित्वं निर्मितं भवति । बालकस्य सर्वाङ्गिणविकासे मातुः भूमिका महत्त्वपूर्णा अस्ति । श्रीमाद्भागवते प्रामुख्येण त्रीणि चरित्राणि प्रसिद्धानि सन्ति येषां माध्यमेन बालकस्य विकासे मातुः शिक्षणस्य महत्त्वपूर्णां भूमिकाम् अवगन्तुं शक्नुमः ।

---

[3] रघुवंशम् ३.६

श्रीमद्भागवते चतुर्थस्कन्धे ध्रुवचरित्रं वर्णितम् अस्ति । स्वायम्भुवमनोः द्वौ पुत्रौ प्रियव्रतोत्तानपादौ । उत्तानपादस्य सुरुचिः सुनीतिः इति द्वे भार्ये स्तः । सुनीतेः पुत्रः अस्ति ध्रुवः । सुरुचेः पुत्रम् उत्तमं लालायन्तं पितरं दृष्ट्वा पित्रङ्कम् आरोढुं पञ्चवर्षीयः ध्रुवः समुत्सुकः भवति । तदा तं भर्त्सयन्ती सुरुचिः वदति मम कुक्षौ भवान् जन्म न प्राप्तवान् अतः यदि नृपासनम् आरोढुम् इच्छसि तर्हि तपसा ईश्वराराधनं कृत्वा मम उदरे जन्म प्रदातुं प्रार्थयतु इति । विमातुः दुरुक्तिभिः ध्रुवस्य या भावावस्था जाता सा व्यासेन सम्यक् वर्णिता अस्ति -

**मातुः सपत्न्याः स दुरुक्तिविद्धः श्वसन् रुषा दण्डहतो यथाहिः ।**
**हित्वा मिषन्तं पितरं सन्नवाचं जगाम मातुः प्ररुदन् सकाशम् ॥**[4]

दण्डेन ताडितः सर्पः यथा व्याकुलः भवति तथा ध्रुवस्य अवस्था आसीत् । सः रुदन् एव मातुः सुनीतेः सकाशं प्राप्तः । तस्य तादृशीम् अवस्थां दृष्ट्वा सुनीत्या यः उपदेशः कृतः सः उपदेशः बालकस्य संवेगात्मकविकासे मातुः स्थानम् अत्यन्तं महत्त्वपूर्णमस्ति इति बोधयति । सुनीतिः ध्रुवम् उपदिशति यत्

**आतिष्ठ तत्तात विमत्सरस्त्वमुक्तं समात्रापि यदव्यलीकम् ।**
**आराधयाधोक्षजपादपद्मं यदीच्छसेऽध्यासनमुत्तमो यथा ॥**[5]

अर्थात् मात्रा यत् उक्तं तत् सत्यमेव अस्ति उत्तमं स्थानं प्राप्तुम् इच्छसि चेत् अधोक्षजपादपङ्कजम् आराधय । मातुः विषये मत्सररहितः भूत्वा व्यवहर । एतस्य उपदेशस्य परिणामात् ध्रुवः तपाचरणं कर्तुं मधुवनं गतवान् तत्र विष्णोः वरं च प्राप्तवान् । वरप्राप्तेः परं प्रत्यागतस्य ध्रुवस्य यत् आचरणम् अस्ति तत् दृष्ट्वा सुनीतेः उपदेशस्य प्रभावं वयं द्रष्टुं शक्नुमः ।

**अभिवन्द्य पितुः पादावाशीर्भिश्चाभिमन्त्रितः । ननाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्रणीः॥**[6]

अर्थात् पितुः पादाभिवन्दनं कृत्वा ध्रुवः मातरौ नमस्कृतवान् । अर्थात् सः सुरुचिम् अपि नमस्कृतवान् । तस्याः विषये किञ्चित् अपि मात्सर्यं द्वेषः वा ध्रुवस्य मनसि नासीत् ।

एतेन चरित्रेण पञ्चवर्षीयबालकस्य मनसि अवमाननस्य सदुपदेशस्य च कीदृशः परिणामः भवति इति ज्ञायते ।

सप्तमस्कन्धे प्रह्लादस्य चरित्रम् अस्ति । हिरण्यकशिपुकयाधोः पुत्रः प्रह्लादः । सनकादीनाम् ऋषीणां शापात् असुरतां प्राप्तः विष्णोः पार्षदः एव हिरण्यकशिपुः । ब्रह्मणः वरप्रसादात् अयम् अत्यन्तम् उन्मत्तः जातः । सः आत्मानमेव ईश्वरत्वेन पूजयितुं प्रजाः आदिष्टवान् । यज्ञयागादीनाम् आचरणे निषेधं कृतवान् सः । यदा हिरण्यकशिपुः तपाचरणार्थं गतः आसीत् तदा तस्य पत्नी कयाधुः अन्तर्वत्नी आसीत् । इन्द्रादयः

---

[4] श्रीमद्भागवतम् ४.८.१४

[5] श्रीमद्भागवतम् ४.८.१९

[6] श्रीमद्भागवतम् ४.९.४५

देवाः दानवेषु आक्रमणं कृतवन्तः । इन्द्रः राजमहिषीं कयाधुं गृहीत्वा स्वर्गं प्रस्थितः । मार्गे देवर्षिः नारदः तम् अपश्यत् कयाधुं मोचयितुं च इन्द्रम् अवदत् । इन्द्रात् मोचिता कयाधुः गर्भवती अस्ति इति ज्ञात्वा देवर्षिः तां स्वाश्रमे स्थापितवान् । तत्र कयाधुः गर्भस्य क्षेमार्थम् ऋषेः सेवां कृतवती ।

**ऋषिं पर्यचरत् तत्र भक्त्या परमया सती । अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छा प्रसूतये ॥**

देवर्षिः नारदः करुणया धर्मस्य तत्त्वं ज्ञानं च तस्यै गर्भं च उद्दिश्य उपदिष्टवान् ।

**ऋषिः कारुणिकस्तस्या प्रादादुभयमीश्वरः । धर्मस्य तत्त्वं ज्ञानं च ममप्युद्दिश्य निर्मलम् ॥**[7]

एतेन एव संस्कारेण संस्कारितः प्रह्लादः महान् भगवद्भक्तः जातः । हिरण्यकशिपुः प्रह्लादं दैत्याचारं बोधयितुम् आचार्यत्वेन शण्डामरकयोः योजनम् अपि कृतवान् । परं सा शिक्षा प्रह्लादस्य भावात्मकपरिवर्तने सफला न जाता । यद्यपि प्रह्लादस्य पिता हिरण्यकशिपुः अत्यन्तं क्रूरः परं प्रह्लादः सच्चरितः जातः तत्र कारणं गर्भावस्थायां कृतः संस्कारः मातुः शिक्षा च ।

पद्मपुराणस्य उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये गोकर्णाख्यानं वर्णितम् अस्ति । मातुः शिक्षा विपरीता भवति चेत् बालकः अपि तथैव भवति एतस्य एतद् उदाहरणम् अस्ति । आत्मदेवब्राह्मणस्य पत्नी धुन्धुली क्रूरा बहुजल्पिका कलहप्रिया च आसीत् ।

**लोकवार्ता रता क्रूरा प्रायशो बहुजल्पिका । शूरा च गृहकृत्येषु कृपणा कलहप्रिया ॥**[8]

गर्भावस्थायां ननान्दा धनं हरेत् इति भीत्या गर्भावस्थाम् अनिच्छन्ती सा भगिन्याः पुत्रं स्वपुत्रमिव दर्शयित्वा पालितवती । धुन्धुकारी इति तस्य नामकरणं सा कृतवती । अर्थात् यथा तस्याः स्वभावः क्रूरः स्वार्थपरः तद्वत् एव कुसंस्कारः पुत्रे अपि जातः । परिणामतः सः पुत्रः युवावस्थायां कथम् आसीत् इत्यस्य वर्णनं पद्मपुराणे एवम् अस्ति

**हिंसकः शस्त्रधारी च दीनान्धानां प्रपीडकः । चाण्डालाभिरतो नित्यं पाशहस्तः श्वसङ्गतः ॥**[9]

**पितर्युपरते तेन जननी ताडिता भृशम् ।**[10]

सः अत्यन्तं हिंसकः जातः दीनान् जनान् पीडयति स्म । लुण्ठनं चौर्यं परस्त्रीपरिग्रहः इति तस्य दैनन्दिनं कार्यं जातम् । अन्ते धनलोभात् मातरम् अपि सः भृशं ताडितवान् तेन सा दिवङ्गता ।

एवं मातुः कुशिक्षायाः प्रभावात् पुत्रः अपि तद्वत् जातः इति दृश्यते ।

**उपसंहारः**

---

[7] श्रीमद्भागवतम् ७.७.१४-१५

[8] श्रीमद्भागवतमाहात्म्यम् ४.१९

[9] श्रीमद्भागवतमाहात्म्यम् ४.६९

[10] श्रीमद्भागवतमाहात्म्यम् ५.१

त्रयाणाम् अपि चरित्राणां परिशीलनेन कांश्चन विषयान् वयम् अवगन्तुं शक्नुमः । प्रारम्भिकबाल्यावस्थायां बालकस्य मनः अत्यन्तं मृदु भवति । केनापि भावेन तत् लाक्षावत् सरलतया द्रवीभवति । तादृशे मनसि यदि अनुकूलः संस्कारः जायते चेत् बालकः सज्जनः भवति यदि प्रतिकूलः संस्कारः जायते चेत् बालकः दुर्जनः भवति । यथा सुनीतिः अवमानेन जातः ध्रुवस्य मनसः विपरीतप्रवाहः योग्येन उपदेशेन सन्मार्गे परिवर्तितवती तद्वत् एव योग्येन उपायेन ताडनक्रोधादीन् विना बालाः बोधनीयाः भवन्ति ।

तदर्थं मातुः स्वभावः अपि शान्तः धैर्यशीलः च अपेक्ष्यते ।

बालकः परिवेशात् मातुः च कथं पठति इत्यस्मिन् सन्दर्भे कालिदासस्य उक्तिः मार्गदर्शिका अस्ति

**उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयमवलम्ब्यचाङ्गुलिम् ।**
**अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः ॥**[11]

अर्थात् रघुः धात्र्या यदुक्तं तस्य अनुकरणं करोति स्म तस्याः अङ्गुलिं धृत्वा चलति स्म । प्रणिपातस्य शिक्षया सः नम्रः जातः । तादृशाचरणेन सः पितुः आनन्दं जनयति स्म । अत्र वयं द्रष्टुं शक्नुमः प्रारम्भिकबाल्यावस्थायाः बालकाः अनुकरणशीलाः भवन्ति परिजनाः यथा आचरन्ति तद्वत् भाषणम् आचरणं कर्तुं ते प्रयतन्ते । अतः मात्रा यत् पाठनीयं तत् आचरणेन पाठनीयं भवति । यथा माता आचरति तथा तां दृष्ट्वा बालकः अपि आचरति । औपचारिकशिक्षार्थं यदा बालः विद्यालयं प्रविशति तदा तेन सह मातुः कृतः संस्कारः एव भवति । एतादृशस्य संस्कारस्य कृते गृहे कीदृशः परवेशः भवेत् इति अथर्ववेदे दृश्यते । **अनुव्रतः पितुः पुत्रो मात्रा भवति संयतः । जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम् ॥**[12]

अर्थात् सन्ततिः पित्रोः व्रतमनुपालयेत्, दम्पती शान्तिपूर्वकं मधुरवाण्या भाषणं कुर्यात् इति ।

प्रकृते काले दूरवाण्याः प्रभावतः कार्यबाहुल्यवशात् वा प्रारम्भिकावस्थायाम् अपत्यस्य पालने मातरः अनवधानवत्यः दृश्यन्ते । तेन बालकेषु अपि क्रोधाधिक्यम् आलस्यम् संवेगादीनाम् अनियन्त्रणम् इत्यादयः दोषाः समुद्भवन्ति । एते एव दोषाः बालकस्य सर्वाङ्गिणविकासे बाधकाः भवन्ति । समाजस्य कृते सभ्यस्य सुशीलस्य च व्यक्तित्वस्य आवश्यकता भवति । एतादृशस्य सभ्यसमाजस्य निर्माणे प्रारम्भिकावस्थायां कृतः मातुः उपदेशः अत्यन्तम् उपकारकः अस्ति ।

उक्तं च केनचित् सुभाषितकारेण

**सुशीलो मातृपुण्येन पितृपुण्येन चातुरः । औदार्यं वंशपुण्येन आत्मपुण्येन भाग्यवान् ॥**

अतः ECCE परिप्रक्ष्ये तिसृष्वपि अवस्थासु मातुः भूमिका महत्त्वपूर्णा अस्ति ।

---

[11] रघुवंशम् ३.२५

[12] अथर्ववेदः ५.१९.२

**सन्दर्भ-ग्रन्थाः :**


1. **रघुवंशम्,** कालिदासः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी २००१
2. **श्रीमद्भागवतम्**, व्यासः, गीताप्रेस, गोरखपुर, २०१०
3. सलूजा चान्दकिरणः, **शिक्षा,** संस्कृतसंवर्धनप्रतिष्ठानम्, २०२३
4. **राष्ट्रिय शिक्षा नीति** 2020, (हिन्दी)
5. शर्मा पि. व्हि., **चरकसंहिता,** चौखम्बा ओरियण्टल, वाराणसी, १९९८
6. सातवळेकरः श्रीपाद दामोदरः, **अथर्ववेद का सुबोध भाष्य**, स्वाध्याय मण्डल, पारडी, १९८५


**********